# संस्कृतवार्ताः

**दिनाङ्क : 16/07/2025** **सायम् - 06:20**

**<u>आदौ-मुख्यवार्ताः</u>**

- **केन्द्रेण कृषि-उत्पादकतां संवर्धयितुं प्रधानमन्त्रि-धन-धान्य-कृषि योजना समनुमता; केन्द्रीय-मन्त्रिमण्डलेन अन्तरिक्ष यात्रिणः शुभांशु-शुक्लस्य अन्तरिक्ष-यात्रायाः श्लाघा-पूर्वकं प्रस्तावः अभ्युपगमितः।**
- **सर्वकारेण अस्य मासस्य एकविंश्यां तिथौ प्रारभमाणात् संसदः प्रावृट्-सत्रात् पूर्वं रविवासरे सर्वदलीयम् उपवेशनमस्ति आकारितम्।**
- **क्षेत्रे विवर्धमानां सुरक्षा-चिन्तां निध्याय भारतेन निज-नागरिकाः ईरानस्य अनावश्यकीं यात्रां न कर्तुं परामृष्टाः।**
- **बैडमिंटन-क्रीडा-स्पर्धायां लक्ष्य-सेनेन सह सात्विकसाईराज-रंकीरेड्डीस्त्यस्य चिराग शेट्टीत्यस्य च युगलं टोक्यो नगरे जापान ओपन स्पर्धायाः द्वितीयं चक्रं प्रविष्टम्।**

-----------------------------------------

**<u>मन्त्रिमण्डल-कृषियोजना</u>**

कृषि-उत्पादकता-संवर्धनाय प्रधानमन्त्रि-धन-धान्य-कृषि-योजना केन्द्रीय-मन्त्रिमण्डलेन अनुमोदिता। योजनायाः उद्देश्यः सस्यानां विविधीकरणाय, स्थायि-कृषिपद्धतेः संवर्धनाय, सस्यानां भण्डारण-संवर्धनाय, जलसेचन-सुविधानां परिष्काराय, ऋणस्य उपलब्धतायां सौविध्य-प्रदानं च अस्ति। अद्य नवदिल्ल्यां मन्त्रिमण्डल-सभायाः अनन्तरं वार्ताहरान् विज्ञापयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत्, योजनायाः अन्तर्गतं देशे एकशतं मण्डलानां चयनं भविष्यति, यत्र त्रयाणां प्रमुख-संकेतानाम् आधारः मुख्यतया भविष्यति यथा - न्यूनोत्पादकता, न्यून-सस्य-सघनता, न्यून-ऋण-वितरणं चेति। अश्विनीवैष्णवः अवदत् यत्, एकादश-विभागेषु, अन्य-राज्य-योजनासु षड्त्रिंशत् विद्यमानानां योजनानां च माध्यमेन योजनाः कार्यान्विताः भविष्यन्ति। श्रीवैष्णवः अवदत् यत्, एषा योजना देशस्य सप्तति-लक्षाधिकैक-कोटि कृषकाणां सहायतां करिष्यति। श्रूयतां तावत् ...

-----------------------------------------

**<u>मन्त्रिमण्डल-शुभांशुशुक्लाः</u>**

केन्द्रीय-मन्त्रिमण्डलेन एक: प्रस्ताव: पारित: अस्ति। यत्र हि अन्तरिक्ष-यात्रिण: शुभांशु-शुक्लस्य अंतरिक्ष-यात्राया: श्लाघा विहितास्ति। ग्रुप कैप्टन शुभांशु-शुक्ल: ह्य: निजान्तरिक्ष-यात्रां सम्पाद्य ससुरक्षं पृथ्वीम् प्रतिनिवर्तित: अस्ति, यो हि भारतस्य अनन्त-आकांक्षाणां प्रातिनिध्यं कुरुते। केन्द्रीय-मन्त्रिमण्डलीयोपवेशनानन्तरम् अद्य नव दिल्ल्यां सञ्चार-माध्यमानि सम्बोधयन्, सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णव: प्रावोचत् यत्, शुभांशु-शुक्लस्य अन्तरिक्ष-अभियानेन साकं भारतस्य अन्तरिक्षे स्थासन-संस्थापनस्य स्वप्नस्य साकारीकरणस्य उपक्रमे एक: बृहत्-पदक्षेप: उत्थापित: अस्ति। अमुना भणितं यत्, केन्द्रीय-मन्त्रिमण्डलं भारतीयान्तरिक्ष-अनुसंधान-संघटनस्य, वैज्ञानिकानां, अभियन्तृ-समुदायस्य च श्लाघां कुरुते, येषाम् अश्रान्त-प्रयासै: एषा उपलब्धि: सम्भवा जाता। श्रीवैष्णव: एतस्मिन् विषयेपि प्रकाशं क्षिप्तवान् यत् तेन मांसपेशीनां पुनर्जनस्य, शैवालस्य, सूक्ष्मजीव-विकासस्य, शस्य-व्यवहार्यताया:, सूक्ष्मजीव-उत्तरजीविताया:, अन्तरिक्षे संज्ञानात्मक-प्रदर्शनस्य, साइनोबैक्टीरिया इत्यस्य जीवाणो: व्यवहारस्य च विषयेषु सूक्ष्म-गुरुत्वाकर्षण-विषयका: अग्रणी-प्रयोगा: विहिता:। अमुना एतदपि प्रोदितं यदेतेन अध्ययनेन मानवान्तरिक्ष-उड्डयनस्य सूक्ष्म-गुरुत्वाकर्षण-विज्ञानस्य च सन्दर्भे वैश्विक-बोध: सुदृढीभविष्यति। अथ च भारतस्य भविष्य-कालिकानाम् अभियानानां कृतेऽपि महत्वपूर्णा आधारभूमि: सूचना च प्रदास्यति एतद् अध्ययनम्। श्रूयतां तावत् किं ब्रूते मन्त्रिवर्य:-

मन्त्रिमहोदय: अवोचत् यत् एतद् सफलाभियानम् अन्तरिक्षान्वेषणे भारतस्य वैश्विकीं प्रतिष्ठां महत्वपूर्ण-रूपेण समुत्तुङ्ग-स्थाने स्थापयति। असौ अवदत् यत् एतद् गगनयानं भारतीयान्तरिक्ष-स्थासनं समेत्य भारतस्य मानवयुक्तस्य अन्तरिक्ष-उड्डयनस्य महत्वाकांक्षाणां दिशि एक: महत्वपूर्ण: पदक्षेपो वर्तते।

-----------------------------------------

## संसदः प्रावृट्सत्रम्

सोमवासराद् आरभमाणात् संसदः प्रावृट्सत्रात् पूर्वं रविवासरे सर्वदलीयोपवेशनं सर्वकारेण समाहूतम्। सर्वदलीयोपवेशनस्य अवसरे प्रावृट्-सत्रावधौ संसदः द्वयोः सदनयोः सुचारुरूपेण संचालने सहयोगाचरणार्थं सर्वकारः सर्वेभ्यः राजनैतिकदलेभ्यः आग्रहं करिष्यति। धेयमस्ति यत् अस्य मासस्य एकविंशति-दिनाङ्कात् आगामिमासस्य एकविंशति दिनाङ्कपर्यन्तं प्रावृट्सत्रं भविष्यति। सत्रस्य कालखण्डे चर्चार्थम्, अभ्युपगमनार्थं च नैकेषां महत्त्वपूर्ण-विधेयकानां प्रस्तुतेः सम्भावना: सन्ति ।

-----------------------------------------

## ईरान-भारतीयदूतावासस्य आग्रहः

ईरानदेश-स्थितेन भारतीय-दूतावासेन भारतीय-नागरिकाः ईरानदेशस्य अनावश्यक-यात्रां न कर्तुम् अध्यर्थिता: सन्ति। विगत-सप्ताहेषु क्षेत्रे संवर्धमानं सुरक्षा-समस्या-समाह्वानं निध्याय एष: यात्रा-परामर्श: दूतावासेन प्रसारित: अस्ति। सोशलमीडिया-पटले दूतावासेन भारतीय-नागरिकेभ्य: ईरानदेशस्य अनावश्यक-यात्रायाः पूर्वं स्थितेः सम्यक्तया विचाराय अपि

जनेभ्य: परामर्शः प्रदत्तः। दूतावासेन नवीनतम-क्षेत्रीय-घटनाक्रमाणां निरन्तरं निरीक्षणाय, भारतीयाधिकारिभिः प्रसारितानां परामर्श-पत्रकाणाम् अनुसरणं च कर्तुं परामर्शोपि प्रदत्तः।

-----------------------------------------

**रक्षाप्रमुख: - सिन्दूरसैन्याभियानम्:**

चीफ ऑफ डिफेंस स्टाफ इति रक्षाप्रमुख: जनरल अनिल-चौहान: प्रोदैरयत् यत् भारतीय-सशस्त्र-बलै: सद्य एव ऑपरेशन सिंदूर इति सैन्याभियानस्य अवसरे पाकिस्तान-द्वारा प्रहृतानि मानव-रहितानि ड्रोन इत्याख्यानि अस्त्राणि सफलतापूर्वकं निष्क्रियी-कृतानि। जनरल चौहान: अद्य नव दिल्ल्यां मानवरहित-वायवीय-अस्त्राणां विषये तेषां च स्वदेशीकरण-विषये समायोजिताम् एकां कार्यशालां सम्बोधयति स्म। अनेन प्रोदीरितं यत् पाकिस्तानस्य केनचिदपि ड्रोन इत्याख्येन मानव-रहित-वायवीयास्त्रेण भारतीय-सैन्य-बलस्य, नागरिक-क्षेत्रस्य च आधारिक-संरचना-स्थलेषु न कापि क्षतिः हानिर्वा प्रापिता। अमुना एतदपि प्रोक्तं यत् ऑपरेशन सिंदूर इति सैन्याभियानेन दैशिकीनां मानव-रहित-वायवीयास्त्र-प्रतिघातक-प्रणालीनां नियोजनस्य महत्वपूर्ण: पक्षश्चापि प्रकाशम् आनीत:। अनेन रक्षास्त्राणां शास्त्राणां च प्रणालीनां विकासार्थं भारतस्य आत्मनिर्भरताया: आह्वानमपि कृतम्, सहैव वैदेशिक-रक्षा-प्रविधिषु देशस्य निर्भरतां न्यूनी कर्तुमपि बलं प्रदत्तम्।

-----------------------------------------

**एफएटीएफ-आतङ्कि-वित्त-पोषणम्**

एफएटीएफ इति वित्तीय-कार्यान्वयन-कार्य-बलेन डिजिटल युगे आतङ्किनां वित्त-पोषणस्य उदीयमानान् सङ्कटान् प्रति सञ्चेतना प्रख्यापिता अस्ति। अथ च एतस्मिन् विषये पाकिस्तानस्य भूमिकापि प्रकाशितास्ति। FATF इति बलेन डिजिटल इति अङ्कीय-विश्वे धनस्य दुरुपयोगस्य सङ्कटम् सविशेषं रेखाङ्कितम् अस्ति, यत्र आतंकवादस्य समर्थनार्थम्, अवैध-गतिविधीनां वित्तपोषणार्थं च धनस्य दुरूपयोग: सम्मिलितो वर्तते। अस्मिन् सन्दर्भे पाकिस्तान-देश: आतङ्कवादिनां वित्तपोषण-विषये एक: उच्च-सङ्कटपूर्ण: क्षेत्राधिकार: प्रतिपादित: अस्ति। भारतेन अपि निज-राष्ट्रिय-सङ्कट-मूल्यांकने पाकिस्तान-द्वारा प्रायोजितातंकवाद: उच्चसङ्कट-पूर्णातङ्क-वित्तपोषण-स्रोतोरूपेण अभिज्ञातः अस्ति।

-----------------------------------------

**सीसीईए-एनएलसी-इंडिया**

आर्थिक-विषयाणां मन्त्रि-मण्डलीय-समित्या NTPC समवाय: NLC इंडिया लिमिटेड समवायश्च नवीकरणीयोर्जा-क्षमता-समेधनार्थं विशेषरूपेण अधिकृतः। अनेन NTPC समवायाय विंशति-सहस्र-कोटि-रूप्यकाणां निवेशस्य अनुमति: मेलिष्यति। अथ च NLC इंडिया लिमिटेड समवायः च सप्त-सहस्र कोटिकानां रूप्यकाणां निवेशार्थम् अनुमत: भविष्यति। अनेन निर्णयेन भारतस्य नवीकरणीयोर्जा-क्षमता-संवर्धने महद् योगदानं भविष्यति।

------------------------------------------

**सीबीएसई**

सी.बी.एस.ई. इति केन्द्रीय-माध्यमिक-शिक्षा-मण्डलेन छात्रेषु स्वस्थजीवनशैल्याः प्रवर्धनार्थं ऑयल बोर्ड स्थापनाय विद्यालया: आदिष्टा:। सी.बी.एस.ई. इत्यनेन केन्द्रीय-माध्यमिक-शिक्षा-मण्डलेन सर्वेभ्यः विद्यालय-प्रमुखेभ्यः लिखिते पत्रे पौष्टिकस्य, स्वस्थतरस्य च खाद्यविकल्पस्य विषये, कक्षासु क्रियाकलाप-परिकल्पनानां च उपलब्धतायाः माध्यमेन विद्यालयेषु स्वस्थ-भोजनस्य शारीरिक-क्रियाकलापस्य च प्रचाराय कथितम् अस्ति। सोपान-मार्गाणाम् उपयोगेन-सह, अल्प-व्यायाम-विरामपूर्वकं च छात्रेषु स्वस्थ्य-जीवन-शैल्या: अंगीकरणार्थं प्रोत्साहनार्थमपि शिक्षा-मण्डलेन उक्तम् अस्ति।

------------------------------------------

**जापान-ओपन-बैडमिण्टन (एचएल-4)**

जापान-ओपन-बैडमिण्टन-क्रीडा-स्पर्धायां भारतस्य अभियानस्य आरम्भः उत्कृष्टरूपेण अभवत्, यत्र अद्य टोक्यो-नगरे स्व-स्व-क्रीडासु प्रभावपूर्णरीत्या क्रीडा-विजयानन्तरं सात्विकसाईराज-रङ्किरेड्डी इत्यस्य चिराग-शेट्टी इत्यस्य च शीर्ष-पुरुष-युगलम् द्वितीय-चक्रं प्रविष्टम्। अथ च एकल-क्रीडकः लक्ष्यसेनः चापि साफल्येन द्वितीयं चक्रं प्रविष्ट:।

**।। ति वार्ता।।**